ओं गं गणपतये नमः
ओं श्री हरिश्री गणपताये नमः

## शनीश्वर कवचं

नारद उवाचः–

ध्यात्वा गणपतिं राजा
धर्म्मराज युधिष्ठिरः
धीरः शनीश्वरस्येयं
चकारस्तवमुत्तमं (1)

शिरो मे भास्करः पातु
फालं च्छायासुतो ऽवतु
कोटराक्षो दृशौपातु
शिखिकण्ठनिभः श्रुती. (2)

घ्राणं मे भीषणः पातु
मुखं बलिमुखो ऽवतु
स्कन्धौ संवर्त्तकः पातु
भुजौ मे भयदो ऽवतु (3)

सौरिर् मे हृदयं पातु
नाभिं शनैश्चरो ऽवतु
ग्रहराजः कटिं पातु
सर्व्वतो रविनन्दनः (4)

पादौ मन्दगतिः पातु
कृष्णः पात्वखिलं वपुः
रक्षां येतां पठेन्नित्यं
सौरेर्ः नामबलैर्युतां (5)

सुखी पुत्री चिरायुश्च
स भवेन्नात्र संशयः
सौरिः शनैश्चरः कृष्णो
नीलोल्पल निभः शनिः (6)

शुष्कोदरो विशालाक्षो

दुर्निरीक्ष्यो विभीषणः
शिखिकण्ठनिभो नीलः
छायाहृदयनन्दनः (7)

काल दृष्टिः कोटराक्षः
स्थूलरोमावलीमुखः
दीर्घो निर्मांसगात्रस्तु
शुष्को घोरो भयानकः (8)

नीलांशूः क्रोधनो रौद्रो
दीर्घश्मश्रु जटाधरः
मन्दो मन्दगति खञ्जो
तृप्तः संवर्त्तको यमः (9)

ग्रहराजः कराळी च
सूर्यपुत्रो रविः शशी
कुजो बुधो गुरुः काव्यो
भानुजः सिंहिकासुतः (10)

केतुर्देवपतिर्बाहुः
कृतान्तो नैरृत स्तथा
शशी मरुत् कुबेरश्च
ईशानः सुर आत्मभूः (11)

विष्णुर् हरो गणपतिः
कुमारः काम ईश्वरः
कर्त्ता हर्त्ता पालयिता
राज्येशो राज्यदायकः (12)

छायासुतः श्यामळांगो
धनहर्त्ता धनप्रदः
क्रूरकर्म्मविधाता च
सर्व्वकर्म्मावरोधकः (13)

तुष्टो रुष्टः कामरूपः
कामदो रविनन्दनः
ग्रहपीडाहरः शान्तो

नक्षत्रेशो ग्रहेश्वरः (14)

स्थिरासनः स्थिरगतिर्
महाकायो महाबलः
महाप्रभो महाकालः
कालात्मा कालकालकः (15)

आदित्यः भयदाता च
मृत्युरादित्यनन्दनः
शतभिः ऋक्षदयितः
त्रयोदशी तिथिप्रियः (16)

तिथ्यात्मकस्तिथिगणो
नक्षत्रगणनायकः
योगराशिर् मुहूर्त्तात्मा
कर्त्ता दिनपतिः प्रभुः (17)

शमीपुष्पप्रियः श्यामः
त्रैलोक्याभयदायकः
नीलवासाः क्रियासिन्धुर्
नीलाञ्जन चयछविः (18)

सर्व्वरोग हरो देवः
सिद्धो देव गणैस्तुतः
अष्टोत्तरशतं नाम्नां
सौरेछाया सुतस्य यः (19)

पठेन्नित्यं तस्य पीडा
समस्ता नश्यति ध्रुवं
कृत्वा पूजांपठेन् मर्त्यो
भक्तिमान् यः स्तवंसदा (20)

विशेषतः शनिदिने
पीडा तस्य विनश्यति
जन्मलग्ने स्तितिर्वापि
गोचरेक्रूर राशिगे (21)

दशासु च गते सौरो
तदास्तवमिमं पठेत्
पूजयेत् यः शनिं भक्त्या
शमीपुष्पाक्षतांबरैः (22)

विधाय लोहप्रतिमां
नरो दुःखात् विमुच्यते
बाधा या ऽन्यग्रहाणां च
यः पठेत् तस्यनश्यति (23)

भीतो भयात् विमुच्येत
बद्धोमुच्येत बन्धनात्
रोगी रोगात् विमुच्येत
नरः स्तवमिमं पठेत् (24)

पुत्रवान् धनवान् श्रीमान्
जायते नात्र संशयः (25)

स्तवं निशम्य पार्त्थस्य
प्रत्यक्षो ऽभूत्शनीश्वरः
दता राज्ञे वरः कामं
शनिश्चान्तर्द्धे तदा (26)